M. T. B. COLLEGE, SURAT

Manuscripts Library

No. Ref.
Ser. V/8

Title Dravya Padartha
(Tattva Sangraha)

V/5

InComplete

Dravya Padartha (Tarka Sangraha)	Title
	Author
	Editor
	Year, Vols.
SK.	Publisher
V/5 Presented by Prof. V. R. Trivedi	Remarks

...नेरूपरससंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वगुरुत्वद्रवत्वस्नेहसंस्कारवत्यः॥ एताश्च...

...मधुराशीता एव रूपरससंस्पर्शाः॥ स्नेहोऽम्भस्येव। सांसिद्धिकं च द्रवत्वम्। तास्तु पूर्ववद्द्विविधा नित्या...

...परमाणुतात्॥ कार्यं पुनस्त्रिविधम्। शरीरेन्द्रियविषयसंज्ञकम्॥ तत्र शरीरमयोनिजमेव वरुणलोके पा-

र्थिवावयवोपष्टम्भादुपभोगसमर्थम्॥ इन्द्रियं सर्वप्राणिनां रसोपलम्भकम्। विजात्यनभिभूतैर्जलावयवै-

रारब्धं रसनम्॥ विषयस्तु सरित्समुद्रहिमकरकादिरिति॥ तेजस्त्वाभिसम्बन्धात्तेजः॥ रूपस्पर्शसंख्यापरिमा-

णपृथक्त्वसंयोगविभागपरत्वापरत्वद्रवत्वसंस्कारवत्। पूर्ववदेषां सिद्धिः॥ शुक्लं भास्वरं च रूपम्॥ उष्ण एवास्य स्प-

र्शः॥ तदपि द्विविधमणुकार्यभावात्॥ कार्यं शरीरादित्रयम्॥ शरीरेन्द्रियविषयसंज्ञकम्॥ शरीरमयो-

निजमेव॥ आदित्यलोके पार्थिवावयवोपष्टम्भाच्चोपभोगसमर्थम्॥ इन्द्रियं सर्वप्राणिनां रूपव्यञ्जकम्॥ अन्या-

वयवानभिभूतैस्तेजोऽवयवैरारब्धं चक्षुः॥ विषयसंज्ञकं तु चतुर्विधम्॥ भौमं दिव्यमुदर्यमाकरजं च॥ तत्र भौमं काष्ठेन्धनप्रभवमूर्ध्वज्वलन-

स्वभावं पचनस्वेदनादिसमर्थम्॥ दिव्यमबिन्धनं सौरं विद्युदादि॥ भुक्तस्याहारस्य रसादिपरिणामार्थमुदर्यम्॥ आकरजं सुव-

र्णादि॥ तत्र संयुक्तसंयुक्तसमवायाद्रसाद्युपलब्धिरिति॥ वायुत्वाभिसम्बन्धाद्वायुः॥ स्पर्शसंख्यापरिमाणपृथक्त्वसंयोगवि-

भागपरत्वापरत्वसंस्कारवान्॥ स्पर्शोऽस्यानुष्णाशीतत्वे सत्यपाकजः॥ स च गुणविनिवेशात्सिद्धः॥ वायुः स्पर्शवानिति॥ अरूपि-

ष्वचाक्षुषवचनात्सप्तसंख्यादयः॥ तृणकर्मवचनात्संस्कारः॥ स चायं द्विविधः॥ अणुकार्यभावात्॥ तत्र कार्यं चतुर्विधं

शरीरमिन्द्रियं विषयः प्राण इति॥ तत्रायोनिजमेव शरीरं मरुतां लोके पार्थिवावयवोपष्टम्भाच्चोपभोगसमर्थम्॥ इन्द्रियं स-

र्वप्राणिनां स्पर्शोपलम्भकं पृथिव्याद्यनभिभूतैर्वाय्ववयवैरारब्धं सर्वशरीरव्यापि त्वगिति॥ विषयस्तूपलभ्यमानस्पर्शा-

धिष्ठानभूतः॥ स्पर्शशब्दधृतिकम्पलिङ्गः॥ तिर्यग्गमनस्वभावको मेघादिप्रेरणादिसमर्थः॥ तस्याप्रत्यक्षस्यापि नाना-

नानुमीयात ॥ संमूर्छनं पुनः समानजवयोर्वाय्वोर्विरुद्धदिक्क्रिययोः सन्निपातः ॥ सोपि तृणादीनामूर्ध्वगमनानुमि[illegible]
[illegible] वियोरूर्ध्वगमनेनानुमीयते ॥ प्राणोन्तःशरीरे रसमलधातूनां प्रेरणादिहेतुः एकः सन्नुक्रियाभेदादपानादिसंज्ञां लभ-
ते इति ॥ इहेदानीं चतुर्णां महाभूतानां सृष्टिसंहारविधिरुच्यते ॥ ब्राह्मेण मानेन वर्षशतान्ते वर्तमानस्य ब्रह्मणोऽपव-
र्गकाले संसारखिन्नानां सर्वप्राणिनां निशि विश्रामार्थं सकलभुवनपतेर्महेश्वरस्य संजिहीर्षासमकालं शरीरे-
न्द्रियमहाभूतोपनिबन्धकानां सर्वात्मगतादृष्टानां वृत्तिनिरोधे सति महेश्वरेच्छात्माणुसंयोगजकर्मभ्यः ॥ शरी-
रेन्द्रियकारणाणुविभागास्तेभ्यस्तत्संयोगनिवृत्तौ तेषामापरमाण्वन्तो विनाशः ॥ तथा पृथिव्युदकज्वलनपवना-
मपि महाभूतानामनेनैव प्रकारेणोत्तरस्मिन्नुत्तरस्मिन् सति पूर्वस्य विनाशः ॥ ततः प्रविभक्ताः परमाणवोऽव-
तिष्ठन्ते धर्माधर्मसंस्कारानुविद्धाश्चात्मानस्तावन्तमेव कालं ॥ ततः पुनः प्राणिनां भोगभूतये मा-
हेश्वरस्य सिसृक्षानन्तरं सर्वात्मगतवृत्तिलब्धादृष्टापेक्षेभ्यश्चेश्वरेच्छानुगतसंयोगेभ्यः पवनपरमा-
णुषु कर्मोत्पत्तौ तेषां परस्परसंयोगेभ्यो द्व्यणुकादिक्रमेण महान् वायुः समुत्पन्नो नभसि दोधूय-
मानस्तिष्ठति ॥ तदनन्तरं तस्मिन्नेव वायावाप्येभ्यः परमाणुभ्यस्तेनैव क्रमेण महान् सलिलनिधिरु-
त्पन्नः पोथूयमानस्तिष्ठति ॥ तदनन्तरं तस्मिन्नेव पार्थिवेभ्यः परमाणुभ्यो द्व्यणुकादिप्रक्रमेण महापृथि-
वी समुत्पन्ना संहतावतिष्ठते ॥ तदनन्तरं तस्मिन्नेव महोदधौ तैजसेभ्योऽणुभ्यो द्व्यणुकादिक्रमेणोत्पन्नो महां-
स्तेजोराशिर्दीप्यमानस्तिष्ठति ॥ एवं चतुर्षु महाभूतेषु महेश्वराभिध्यानमात्रात्तैजसेभ्योऽणुभ्यः पार्थिव-
परमाणुसहितेभ्यो महदण्डमारभ्यते ॥ तस्मिंश्चतुर्वदनकमलं सर्वलोकपितामहं ब्रह्माणं सकलभुवन-
[illegible] प्रजासर्गे विनियुङ्क्ते ॥ स च महेश्वरेण विनियुक्तो ब्रह्मा निरतिशयज्ञा[illegible]

[illegible] कर्मानुरूपज्ञानोपभोगायुषः सुतान्प्रजापतीन् [illegible]
णान्मुखबाहूरुपादतश्चतुरो वर्णानन्यानि चोच्चावचानि सृष्ट्वाशयानुरूपैर्धर्मज्ञा[illegible]
श्वर्यैः संयोजयति ॥ इति सृष्टिसंहारौ ॥ आकाशकालदिशामेकैकत्वादपरजात्यभावे पारिभा-
षिक्यस्तिस्रः संज्ञा भवन्ति ॥ आकाशः कालो दिगिति ॥ तत्राकाशस्य गुणाः शब्दसंख्यापरिमाणपृ-
थक्त्वसंयोगविभागाः ॥ शब्दः प्रत्यक्षत्वे सत्यकारणगुणपूर्वकत्वादयावद्द्रव्यभावित्वादाश्रयादन्य-
त्रोपलब्धेश्च न स्पर्शवद्विशेषगुणः ॥ बाह्येन्द्रियप्रत्यक्षत्वादात्मान्तरग्राह्यत्वादात्मन्यसम-
वायादहङ्कारेण विभक्तग्रहणाच्च नात्मगुणः ॥ श्रोत्रग्राह्यत्वाद्विशेषगुणभावाच्च न दिक्कालमनसां ॥
परिशेषाद्गुणो भूत्वा आकाशस्याधिगमे लिङ्गम् ॥ शब्दलिङ्गाविशेषादेकत्वं सिद्धं ॥ तदनुविधाना-
त्पृथक्त्वं ॥ विभववचनात्परममहत्परिमाणं ॥ शब्दकारणत्ववचनात्संयोगविभागाविति ॥ अतो गुण-
वत्त्वादनाश्रितत्वाच्च द्रव्यम् ॥ समानासमानजातीयकारणाभावाच्च नित्यः सर्वप्राणिनां शब्दोपल-
ब्धिनिमित्तं श्रोत्रभावेन ॥ श्रोत्रं पुनः श्रवणविवरसंज्ञको नभोदेशः ॥ शब्दनिमित्तोपभोगप्राप-
कधर्माधर्मोपनिबद्धः ॥ तस्य च नित्यत्वे सत्युपनिबन्धकवैकल्याद्बाधिर्यमिति ॥ कालः परापरव्यति-
करयौगपद्यायौगपद्यचिरक्षिप्रप्रत्ययलिङ्गः ॥ तेषां विषयेषु पूर्वप्रत्ययविलक्षणानामुत्पत्तावन्यनि-
मित्ताभावाद्यदत्र निमित्तं स कालः ॥ सर्वकार्याणां चोत्पत्तिस्थितिविनाशहेतुः ॥ तद्व्यपदेशात् क्षणल-
वनिमेषकाष्ठाकलामुहूर्तयामाहोरात्रार्द्धमासर्त्वयनसंवत्सरयुगकल्पमन्वन्तरप्रलयमहाप्र-
लयव्यवहारहेतुश्च ॥ तस्य गुणाः संख्यापरिमाणपृथक्त्वसंयोगविभागाः ॥ काललिङ्गाविशेषा

णपूर्वदक्षि
णेन दक्षि
णापरेण
पश्चिमोत्त
५

व सिद्धिः ॥ तदनुविधानात्पृथक्त्वं ॥ कारणे काल इति वचनात् कारणपरत्वादिवचनात् संयोगः ॥ तद्विन
त्वाद्विभाग इति ॥ तस्याकाशवद्विभुत्वान्नित्यत्वसिद्धिः ॥ काललिङ्गाविशेषादञ्जसैकत्वेऽपि स
र्वाणां प्रारम्भक्रियाभिनिर्वृत्तिस्थितिनिरोधोपाधिभेदान्मणिवत्पाचकवद्वा नानात्वोपचारः ॥
दिक्पूर्वापरादिप्रत्ययलिङ्गा ॥ मूर्त्तद्रव्यमवधिं कृत्वा मूर्त्तेष्वेव द्रव्येष्वेतस्मादिदं पूर्वेण दक्षिणेना
मनोत्तरेण उत्तरपूर्वेणाधस्तादुपरिष्टाच्चेति दश प्रत्यया यतो भवन्ति सा दिगिति ॥ अन्यनिमि
त्तासम्भवात् ॥ तस्यास्तु गुणाः संख्यापरिमाणपृथक्त्वसंयोगविभागाः ॥ कालवदेते सिद्धाः ॥ दिग्लिङ्गा°
विशेषादञ्जसैकत्वेऽपि दिशः परमर्षिभिः श्रुतिस्मृतिलोकव्यवहारार्थं मेरुं प्रदक्षिणमावर्त्तमानस्य
भगवतः सवितुर्ये संयोगविशेषा लोकपालपरिगृहीतप्रदेशानामन्वर्थाः ॥ तेषां प्राच्या
दिभेदेन दशविधाः संज्ञाः प्रकृताः ॥ ततो भक्त्या दश दिशः सिद्धाः ॥ तासामेव देवतापरिग्रहणा
त् पुनर्दश संज्ञा भवन्ति ॥ तद्यथा ॥ माहेन्द्री वैश्वानरी याम्या नैर्ऋती वारुणी वायवी कौबेरी ऐशान
ली नागी चेति ॥ आत्मत्वाभिसंबन्धादात्मा तस्य सौक्ष्म्यादप्रत्यक्षत्वे सति करणैः शब्दा
द्युपलब्ध्यनुमितैः श्रोत्रादिभिः समधिगमः क्रियते ॥ वास्यादीनामिव करणानां कर्तृप्रयो
ज्यत्वदर्शनात् ॥ शब्दादिषु प्रसिद्ध्या च प्रसाधकोऽनुमीयते ॥ न शरीरेन्द्रियमनसा
मज्ञत्वात् ॥ न शरीरस्य चैतन्यं घटादिवद्भूतकार्यत्वात् ॥ मृते चासम्भवात् ॥ नेन्द्रियाणां
करणत्वात् ॥ उपहतेषु विषयासान्निध्ये चानुस्मृतिदर्शनात् ॥ नापि मनसः करणान्
तरानपेक्षित्वे युगपदालोचनस्मृतिप्रसङ्गात् स्वयं करणभावाच्च ॥

...धिगम्यते ॥ शरीरसमवायिनीभ्यां हिताहितप्राप्तिपरिहारयो...
रथकर्मणा सारथिवत्प्रयत्नवान्विग्रहस्याधिष्ठातानुमीयते ॥ प्राणादिभिश्च ॥ क
शरीरपरिगृहीते वायौ विकृतकर्मदर्शनात् ॥ भस्त्राध्मापयितेव ॥ निमेषोन्मेषकर्मणा
वानुमीयते ॥ नियतेन दारुयन्त्रप्रयोक्तेव ॥ देहस्य वृद्धिक्षतभग्नसंरोहणादिनिमित्तत्वा
द्गृहपतिरिव ॥ अभिमतविषयग्राहककरणसंबन्धनिमित्तेन मनसः कर्मणा गृहकोणस्थ
पेलकप्रेरकोदारक इव ॥ नयनविषयालोचनानन्तरं रसानुस्मृतिक्रमेण रसनविक्रियाद
र्शनादनेकगवाक्षान्तर्गतप्रेक्षकवदुभयदर्शी ॥ सुखदुःखेच्छाद्वेषप्रयत्नैश्च गुणैर्गुण्यनु
मीयते ॥ ते च न शरीरेन्द्रियगुणाः ॥ कस्मादहंकारेणैकवाक्यताभावात् ॥ प्रदेशवृत्तित्वादयाव
द्द्रव्यभावित्वाद्बाह्येन्द्रियाप्रत्यक्षत्वाच्च ॥ तथाहं शब्देन पृथिव्यादिशब्दव्यतिरेकादि
ति तस्य गुणाः ॥ बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मसंस्कारसंख्यापरिमाणपृथक्त्व
संयोगविभागाः ॥ आत्मलिङ्गाधिकारे बुद्ध्यादयः प्रयत्नान्ताः सिद्धाः ॥ धर्माधर्मावात्मा
न्तरगुणानामकारणत्ववचनात् ॥ संस्कारः स्मृत्युत्पत्तौ ॥ व्यवस्थाव
संख्या ॥ पृथक्त्वमपि तत एव ॥ तथात्मनि विभुवचनात्परममहत्परिमाणमेव ॥ सन्निकर्षज
सुखदुःखादीनां संयोगः ॥ तद्विनाशकत्वाद्विभाग इति ॥ मनस्त्वाभिसम्बन्धान्मनः ॥ क

यात्मेन्द्रियार्थसान्निध्ये ज्ञातसुखादीनामनुत्पत्तिदर्शनात्कारणान्तरमनुमीय
श्रोत्राद्यव्यापारे स्मृत्युत्पत्तिदर्शनाच्च ॥ बाह्येन्द्रियैरगृहीतसुखादिग्राह्यान्तरसद्भा
वाच्च ॥ तस्य गुणाः संख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वसंस्काराः ॥
प्रयत्नज्ञानायौगपद्यवचनात्प्रतिशरीरमेकत्वं सिद्धं ॥ पृथक्त्वमप्यत एव ॥ तद
भाववचनादणुपरिमाणं ॥ अपसर्पणोपसर्पणवचनात्संयोगविभागौ ॥ मूर्त्तत्वात्प
रत्वापरत्वे संस्कारश्च ॥ अस्पर्शवत्वाद्द्रव्यानारम्भकत्वं ॥ क्रियावत्वान्मूर्त्तत्वं ॥ साधा
रणविषयवत्वाज्ञत्वं ॥ स्वयंकरणभावात्परार्थं गुणवत्वाद्द्रव्यत्वं ॥ प्रयत्नादृष्टपरि
ग्रहवशादाशुसञ्चारि चेति ॥ इति द्रव्यपदार्थः समाप्तः ॥ शुभमस्तु ॥ ज्यो ॥ निर्विदजा
र दास वर लेख्यः ॥